## भीमादयोऽपादाने । (७४/३१७३)

भीमादयः शब्दा अपादाने निपात्यन्ते । [1]उणादिप्रत्ययान्ता एते, 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्' (उ. १.१४४), 'भियष्षुक् ह्रस्वश्च' (उ. १४७) इत्येवमादयः । 'ताभ्यामन्यत्रोणादयः' (३.४.७५/३१७४) इति पर्यदासे प्राप्ते निपातनमारभ्यते ।

भीमः । भीष्मः । [2]भयानकः । [3]वरुः । [4]भूमिः । रजः । संस्कारः । [5]संक्रन्दनः । [6]प्रपतनः । समुद्रः । स्रुचः । [7]स्रुक् । खलतिः[8] ॥

## ताभ्यामन्यत्रोणादयः । (७५/३१७४)

उणादयः [9]शब्दाः ताभ्यामपादानसम्प्रदानाभ्यामन्यत्र [10]कारके भवन्ति । कृत्वात् कर्तर्येव प्राप्ताः कर्मादिषु [11]कथ्यन्ते । ताभ्याम् इति सम्प्रदानार्थः प्रत्यवमर्शः, अन्यथा ह्यपादानमेव पर्युदस्येत, अनन्तरत्वात् । कृषितोऽसौ कृषिः[12] । [13]तनित इति तन्तुः । वृत्तम् इति [14]वर्त्म । चरितं चर्म ॥

## क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः । (७६/३०८०)

ध्रौव्यार्थाः अकर्मकाः,[15] प्रत्यवसानार्थाः [16]अभ्यवहारार्थाः इति स्वनिकायप्रसिद्धिः । [17]ध्रौव्यगतिप्रत्यवसानार्थेभ्यः[18] यः क्तो विहितः सोऽधिकरणे[19] भवति । चकाराद् यथाप्राप्तं [20]च । ध्रौव्यार्थेभ्यः कर्तृभावाधिकरणेषु, गत्यर्थेभ्यः कर्तृकर्मभावाधिकरणेषु, प्रत्यवसानार्थेभ्यः कर्मभावाधिकरणेषु । ध्रौव्यार्थेभ्यः तावत् – आसितो देवदत्तः, आसितं [21]तेन, इदमेषामासितम् । गत्यर्थेभ्यः – यातो देवदत्तो ग्रामम्, यातो देवदत्तेन ग्रामः, यातं देवदत्तेन, इदमेषां यातम् । प्रत्यवसानार्थेभ्यः – [22]भुक्तः ओदनो देवदत्तेन, देवदत्तेन भुक्तम्, इदमेषां भुक्तम् । कथं भुक्ता ब्राह्मणाः, पीता गावः इति । अकारो मत्वर्थीयः, भुक्तमेषामस्ति, पीतमेषामस्ति इति ॥

## लस्य । (७७/२१५३)

लस्य इत्ययमधिकारः[23] । अकार उच्चारणार्थः । लकारमात्रं स्थानित्वेनाधिक्रियते । यद् इत ऊर्ध्वमनुक्रमिष्यामः लस्य इत्येवं तद् वेदितव्यम् । किं [24]चेदं लस्य इति ? दश लकारा अनुबन्धविशिष्टा विहिता अर्थविशेषे कालविशेषे च । तेषां विशेषकराननुबन्धानुत्सृज्य यत् सामान्यं तद् [25]गृह्यते । [26]षट् टितः, चत्वारः ङितः । अक्षरसमाम्नायवदानुपूर्व्या कथ्यन्ते । लट् । लिट् । लुट् । लृट् । लेट् । लोट्[27] । लङ् । लिङ् । लुङ् । लृङ् । इति[28] । अथ लकारमात्रस्य ग्रहणं कस्मान् न भवति, लुनाति, चूडालः इति ? धात्वधिकारोऽनुवर्तते, कर्त्रादयश्च [29]विशेषकाः ॥

---

1. उणाद्यन्ताः फ. 2. अचेतनः फ. 3. बहुः फ.ब.ह. 4. भूमिः रजः संस्कारः नास्ति ब. 5. प्रस्यन्दनः ह, प्रस्कन्दनः ब. 6. प्रतपनः फ. 7. स्रुवः ब. 8. दृष्टिः रक्षः शकुः सुकः इत्यधिकम् ब, मूर्खः इत्यधिकम् क.फ, गृष्टिः संकुः मूलः खलः इत्यधिकम् ह. 9. प्रत्ययाः फ, प्रत्ययान्ताः ह. 10. कारके नास्ति फ. 11. अपि दृश्यन्ते ब.फ.ह. 12. भवति इत्यधिकम् ब. 13. तनितोऽसौ फ.ह.ब. 14. तत् इत्यधिकम् ह. 15. गत्यर्थाः इत्यधिकम् ह. 16. अभ्यवहरणार्थाः फ. 17. वाक्यमिदं नास्ति फ. 18. धातुभ्यः इत्यधिकम् फ. 19. अपि इत्यधिकम् फ. 20. तत्र अ. ब. फ, च नास्ति ह. 21. देवदत्तेन ग. फ. 22. भुक्तः ओदनं देवदत्तः अ. 23. वेदितव्यः इत्यधिकम् फ. 24. चैष ह. 25. परिगृह्यते फ.ह. 26. तेषाम् इत्यधिकम् ह. 27. एते षट् इत्यधिकम् ब. 28. एते चत्वारः इत्यधिकम् ब. 29. विशेषकराः ह.